## प्रातस्स्मरण स्तोत्रम्

## *Prātassmaraṇa stotram*

प्रातस्स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तमवैति नित्यं
तद्ब्रह्म निष्कलमहं न च भूतसङ्घः ।। १

*prātassmarāmi hṛdi saṃsphuradātmatattvaṃ*
*saccitsukhaṃ paramahaṃsagatiṃ turīyaṃ,*
*yatsvapnajāgarasuṣuptamvaiti nityaṃ*
*tadbrahma niṣkalamahaṃ na ca bhūtasaṅghaḥ.*

प्रातर्भजामि मनसो वचसामगम्यं
वाचो विभान्ति निखिला यदनुग्रहेण ।
यं नेति नेति वचनैर्निगमा अवोचन्
तं देवदेवमजमच्युतमाहुरग्र्यम् ।। २

*prātarbhajāmi manaso vacasāmagamyaṃ*
*vāco vibhānti nikhilā yadanugraheṇa,*
*yaṃ neti neti vacanairnigamā avocan*
*taṃ devadevamajamacyutamāhuragryam.* 2

प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजंगम इव प्रतिभासितं वै ।। ३

*prātarnamāmi tamasaḥ paramarkavarṇaṃ*
*pūrṇaṃ sanātanapadaṃ puruṣottamākhyam,*
*yasminnidaṃ jagadaśeṣamaśeṣamūrtau*
*rajjvāṃ bhujaṅgama iva pratibhāsitaṃ vai.* 3

श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ।
प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ।। ४

*ślokatrayamidaṃ puṇyaṃ lokatrayavibhūṣaṇam,*
*prātaḥkāle paṭhedyastu sa gacchet paramaṃ padam.*